# Shivaproktam Shrutisaranirupanam

# શિવપ્રોક્તં શ્રુતિસારનિરૂપણમ્

## Document Information

Text title : Shivaproktam Shrutisaranirupanam

File name : shrutisAranirUpaNamshivaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 51 - shrutisAranirUpaNam | 2-56||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# શિવપ્રોક્તં શ્રુતિસારનિરૂપણમ્

અહમેકોઽખિલાધારશ્ચાહં વિશ્વપ્રવર્તકઃ ।
અહં વિશ્વમિદં સર્વં મય્યેવાન્ત્યે વિશત્યમ્પિ ॥ ૨॥

અહં ધાતા વિધાતાચ મત્તોઽન્યો નાસ્તિકશ્ચન ।
સૃજામીદં ગ્રસામીદં ભરામીદંસુરોત્તમાઃ ॥ ૩॥

યથોર્ણનાભિસ્સૂત્રાંશ્ચ ગ્રસતે સૃજતીત્યપિ ।
તથૈવેદં જગજ્જાલં ભવદ્ભિસ્સુરસત્તમાઃ ॥ ૪॥

કાલાત્માહં બ્રહ્મક્ષત્રમોદનં મૃત્યુપાદશમ્ ।
અહં જીવં પ્રવિશ્યૈવ સર્વભૂતેષુ સંસ્થિતઃ ॥ ૫॥

સર્વભૂતેષુ ભૂતાન્તર્ગુહાયાં સર્વદા સ્થિતઃ ।
સર્વેન્દ્રિયગુણાતીતસ્સર્વેન્દ્રિયવિવર્જિતઃ ॥ ૬॥

મદાધારા ઇમે લોકા લોક્યા યૂયં સુરાસુરાઃ ।
તપને તાપકશ્ચાહં ચન્દ્રેચૈવ પ્રસાદકઃ ॥ ૭॥

અનિલે ચલનશ્ચાહમનલે હ્યુષ્ણકો હ્યહમ્ ।
ઇન્દ્રે યમે પ્રતાપોઽહં લક્ષ્મીશ્ચાહં ધનાધિપે ॥ ૮॥

અશ્વિનેઽપિ ચ ભૈષજ્યં મરુતાં માતરસ્સદા ।
વિશ્વેષાં હૃદયશ્ચાહં વસૂનાં હૃદ્ગતસ્સદા ॥ ૯॥

અસુરાણાં સુરાણાઞ્ચ સમ્પદા સમવસ્થિતઃ ।
તમસા સાત્વિકેનૈવ મુનીનાં રાજસસ્સુરાઃ ॥ ૧૦॥

ગુણત્રયોઽહં વિબુધા ગુણહીનોઽસ્મિ કેવલઃ ।
અહં હિ નિર્ગુણસ્સાક્ષાત્તમઃ પારે પ્રતિષ્ઠિતઃ ॥ ૧૧॥

અપાંરસસ્તથૈવાહં જ્તોતિષાં જ્યોતિરસ્મ્યહમ્ ।
ભૂતાકાશેચેતયિતાવ્યાપકશ્શબ્દગોસ્મ્યહમ્ ॥ ૧૨॥

પૃથિવ્યાગ્ચ તથા ગન્ધો ગુણો દેવાશ્ચ સંસ્થિતઃ ।
વાયુશ્ચાહં તથા દેવા એતેષામાદ્યસૃષ્ટયઃ ॥ ૧૩॥

(વાયુશ્ચાહં તથા દેવા એષાં સન્ધાવિસૃષ્ટયઃ) ॥ ૧૩॥

ચરાચરમિદં પ્રોક્તં જગત્સ્થાવરજઙ્ગમમ્ ।
એતેષામાનુલોમ્યેન સૃષ્ટયસ્સ્યુઃ પ્રવર્તિતાઃ ॥ ૧૪॥

એતેષાં પ્રાતિલોમ્યેન સ્થિતૌ પ્રલયસઞ્જ્ઞિતાઃ ।
એતેષાં કાર્યકરણે નૈવ કિઞ્ચિદહં સુરાઃ ॥ ૧૫॥

નિલિમ્પા નૈવ લોપેન કિન્તુ સાક્ષી સનાતનઃ ।
મત્સન્નિધાનવિરહે જગન્નૈવ પ્રરોચતે ॥ ૧૬॥

અયસ્કાન્તમણેર્યદ્વત્સન્નિધૌ લોહસૂચયઃ ।
ચેષ્ટન્તિ વિવિધં દેવાસ્તથૈવેદં જગત્સુરાઃ ॥ ૧૭॥

સન્નિધૌ ચેષ્ટતે મેઽદ્ય સર્વે ક્રીડનકા મમ ।
મમ રૂપપરિજ્ઞાનં ભવતામતિદુર્લભમ્ ॥ ૧૮॥

ષડૂર્મિરહિતશ્ચાહં પઞ્ચકૃત્યવિવર્જિતઃ ।
બ્રહ્માપ્યહં સૃજામીદં રજસા કેવલં જગત્ ॥ ૧૯॥

વિષ્ણુઃપાલયિતા ચાહં સાત્વિકં ગુણમાસ્થિતઃ ।
રુદ્રોભૂત્વાસંહરામિ તામસોઽહં ચરાચરમ્ ॥ ૨૦॥

સદાશિવોઽહં દેવેશો હ્યનુગ્રહકરોઽસ્મ્યહમ્ ।
મન્માયામોહિતં ચૈવ કરોમીશ્વરરૂપધૃક્ ॥ ૨૧॥

પઞ્ચકૃત્યપરશ્ચાહં પઞ્ચકોશાતિગોઽસ્મ્યહમ્ ।
પઞ્ચપ્રાણવિહીનોઽહં પઞ્ચભૂતૈકવર્તનઃ ॥ ૨૨॥

ઇયં મમ પરા શક્તિર્વિક્ષેપાવરણાત્મિકા ।
યયા સમ્મોહિતા યૂયં જગત્સાસુરમાનુષમ્ ॥ ૨૩॥

સ્થાસ્નુર્ગચ્છત્સુરેન્દ્રાશ્ચ પરાશક્તિરિયં મમ ।
સૃષ્ટૌ સ્થિતૌ તથા નાશે કારણમ્ત્વિયમેવ હિ ॥ ૨૪॥

મમૈવ શક્તિઃ પરમા વિવિધજ્ઞાનદાયિની ।
એનાં પ્રણમત ક્ષિપ્રમેતસ્યાઃ કૃપયા સુરાઃ ॥ ૨૫॥

મત્પ્રસાદાદાવરણશક્તિનાશઃ પ્રજાયતે ।
યાવત્કર્મવિપાકો હિ દેહિનાં ભવતાં સુરાઃ ॥ ૨૬॥

વિક્ષેપાય ચ સા શક્તિરનુવર્તેત સત્તમાઃ ।
મમૈવાંશો જીવ એવ સ્વાજ્ઞાનાત્પરિજૃમ્ભતે ॥ ૨૭॥

નાનાયોનિશરીરેષુ હ્યશીર્ણો દુઃખભાગભુક્ ।
એવં દ્વિધા દેહગેહે વૃક્ષે પક્ષિવદાસ્થિતૌ ॥ ૨૮॥

એકઃ કર્માત્મકં ભુઙ્ક્તે ફલં વૈ સુખદુઃખયોઃ ।
તથાન્યસ્સાક્ષિવદ્ભાતિ દ્વાસુપર્ણેતિ મન્ત્રતઃ ॥ ૨૯॥

બ્રહ્મૈવ સંસરત્યેષ સ્વાવિદ્યાતો દિવૌકસઃ ।
સ્વવિદ્યયા મુચ્યતે ચ તપસાકેવલેન હિ ॥ ૩૦॥

અહમ્માનતયાપન્નઃ ફલભુક્સુખદુઃખયોઃ ।
સ્વર્ગે ચ નરકે ચૈવ સદા વૈ સમ્પ્રવર્તતે ॥ ૩૧॥

મજ્જ્ઞાનાન્મુક્તિમાપ્નોતિનાન્યથાકર્મકોટિભિઃ ।
જીવાપેતમ્મ્રિયત્યેતન્નજીવોમ્રિયતેસુરાઃ ॥ ૩૨॥

ષડૂર્મિરહિતશ્ચાહં સર્વદેહેષુ સત્તમાઃ ।
ષટ્કોશકમિદં દેહં પ્રવિશ્યાખિલભાસકઃ ॥ ૩૩॥

ષડૂર્મિરિન્દ્રિયોર્થૈશ્ચ કામયામિ ચરાચરમ્ ।
(ષડ્વર્ગૈરિન્દ્રિયાર્થૈશ્ચ કામયામિ ચરાચરમ્) ।
સત્યકામશ્ચ સઙ્કલ્પસ્સર્વલોકાન્ત્સૃજામ્યહમ્ ॥ ૩૪॥

સઙ્કલ્પાત્પિતરોદેવાઉપતિષ્ઠન્તિમામિહ ।
નમેશોકોઽસ્તિમોહોવાજિઘૃત્સાચપિપાસકા ॥ ૩૫॥

અશરીરશ્શરીરેષુ હ્યનવસ્થેષ્વવસ્થિતઃ ।
મહાંશ્ચાહં વિભુશ્ચાહમાત્માશીર્યોઽહમેવ હિ ॥ ૩૬॥

અવસ્થાત્રયદૂરોઽહમસઙ્ગઃ પુરુષસ્ત્વહમ્ ।
સર્વાકાશસ્સર્વભાસસ્સર્વાવાસોઽહમીશ્વરઃ ॥ ૩૭॥

યો માં વેદ સ વેદેદં યો મામજ્ઞાનમોહિતઃ ।
પરાદાત્સ પરાદેદં જ્ઞાત્વાનન્દં વિભેતિ ન ॥ ૩૮॥

શાન્તિ પરાં ગચ્છતિ ચ ન કામી ભવતિ સ્થિરઃ ।

બ્રહ્મ માં વેદ સ બ્રહ્મ માં વેત્યેવ સુરાસુરાઃ ॥ ૩૯॥

(બ્રહ્મ માં વેદ સ બ્રહ્મ ભવત્યેવ સુરાસુરાઃ) ॥ ૩૯॥

અસ્તિબ્રહ્મેતિમાંવેદતસ્યાહં મોચકોઽસ્મિ ચ ।
નાન્તઃપ્રજ્ઞશ્ચન બહિઃપ્રજ્ઞાનં બ્રહ્મચાસ્મ્યહમ્ ॥ ૪૦॥

એષોન્તર્માયિચ સદા હ્યમૃત્યોર્મૃત્યુરૂપતઃ ।
અહમેવ સદા બ્રહ્મ સાક્ષ્યસાક્ષ્યાદિવર્જિતઃ ॥ ૪૧॥

અયમાત્મા સદા બ્રહ્મ દેશકાલસ્થિતોઽપ્યહમ્ ।
તત્વમેતત્સર્વમસીત્યાદિવાક્યૈકરૂપતઃ ॥ ૪૨॥

અહં વાક્યેષુ સર્વેષુ ચાહમેવાસ્મિ ભાસકઃ ।
આનન્દં પરમં જ્ઞાત્વા તરત્યેવ ભવાર્ણવમ્ ॥ ૪૩॥

ઉપાસ્યં મામભિજ્ઞાત્વા શોકમોહૌ તરત્યપિ ।
યૂયં મામેવ જાનીથાપ્યન્યત્સર્વં વૃથૈવ હિ ॥ ૪૪॥

સત્યં જ્ઞાનમનન્તોઽહં અસત્યાત્સત્યતા જગત્ ।
(સત્યં જ્ઞાનમનન્તોઽહં મત્સત્યાત્સત્યતા જગત્) ।
મત્સત્તયૈવ હિ જડં ચેતતે વિવિધં જગત્ ॥ ૪૫॥

મહાનન્દામ્બુધેસ્સર્વે શીકરં જગદેવ હિ ।
રસોઽહં સર્વભૂતેષુ રસતાં જાનતે તુ યે ॥ ૪૬॥

રસાસ્તેનન્દમાત્રઞ્ચ જીવન્ત્યેવસુરાસ્સદા ।
કોવાન્યઃપ્રાણિતિસદામદાકાશંવિનાસુરાઃ ॥ ૪૭॥

ન તત્ર ગચ્છતિ મનો નવાગ્ગચ્છતિ ચેન્દ્રિયમ્ ।
પરમાત્માહમેવાદ્ય સ એવાદ્ય સ ઉશ્વકઃ ॥ ૪૮॥

અસઙ્ગસ્ત્વરસસ્પર્શોહ્યઘ્રાણો ગન્ધ એવ હિ ।
અપાણિપાદકાર્યાદિઃ પાયૂપસ્થાદિવર્જિતઃ ॥ ૪૯॥

પ્રમાપ્રમેયરહિતસ્તર્કદૂરોઽહમેવ હિ ।
અહં જાનામિ સર્વં હિ ન માં જાનાતિ કશ્ચન ॥ ૫૦॥

પરાઞ્ચિ ખાન્યકૃણવં તસ્માન્માઞ્ચ ન પશ્યતિ ।
મત્પ્રસાદયુતઃ કશ્ચિજ્જાનાત્યેવ હિ વા ન વા ॥ ૫૧॥

દ્રષ્ટાહં દૃશ્યરહિતો દર્શનઞ્ચાહમેવ હિ ।
ષોડશોઽહં સુરશ્રેષ્ઠાશ્શ્રોતા ઘ્રાતાહમેવ હિ ॥ ૫૨॥

બુદ્ધેર્બોદ્ધા મનશ્ચાપિ પ્રાણપ્રાણોઽહમીશ્વરઃ ।
સર્વા એવ કલા દેહે ચેન્દ્રિયાણ્યહમેવ હિ ॥ ૫૩॥

સર્વે મય્યેવ લીયન્તે નાહં તેષુ વ્યવસ્થિતઃ ।
(સર્વે મય્યેવ લીયન્તે તેનાહં તેષ્વવસ્થિતઃ) ।
એક એવાહમદ્વૈતશ્ચતુર્થશ્શિવ એવ હિ ॥ ૫૪॥

મજ્જં મલ્લઞ્ચ મદનં જગદ્વિદ્ધ સુરાસ્સદા ।
ભૂમાહં પરમાનન્દો માં ન જાનાતિ કશ્ચન ॥ ૫૫॥

એકોઽહં ભુવને જડાજડગતિસ્સ્વૈરં હિ નાનાજગત્
નાસ્ત્યેવ પ્રતિભાતિ કિઞ્ચિદપિ વૈ તન્માર્ગતૃષ્ણોપમમ્ ।
તેનાદ્રી ન ભવેત્ક્ષમા સુરગણા નાસ્ત્યેવ કિઞ્ચિજ્જગત્સર્વં
શમ્ભૂતયા વિભાતિ સકલં કસ્યસ્વિદેતત્સુરાઃ ॥ ૫૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે શિવપ્રોક્તં શ્રુતિસારનિરૂપણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫૧ - શ્રુતિસારનિરૂપણમ્ । ૨-૫૬॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 51 - shrutisAranirUpaNam . 2-56..

Notes:
Śiva શિવ elucidates to Devī દેવી the Essence of Śruti-s શ્રુતિસાર; whereby, He details about His Presence in all that is manifest and non-manifest, as told by Him to the Deva-s દેવાઃ.

Encoded and proofread by Ruma Dewan

*Shivaproktam Shrutisaranirupanam*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*